# ज्ञाताधर्मकथोपनिषद्



# णायाणि य
# धम्मकहाओ य

णमोत्थु णं समणस्स भगवओ महावीरस्स

श्रीप्रेम-भुवनभानु-पद्म-जयघोषसूरिभ्यो नमः

लब्धिनिधान-पञ्चमगणधर-

श्रीसुधर्मस्वामिप्रणीत-

श्रीज्ञाताधर्मकथाङ्गसूत्रस्य

सारसञ्चयरूपा

# ज्ञाताधर्मकथोपनिषद्

• सञ्चयनम् - सम्पादनम् •

प्राचीनश्रुतोद्धारक

प.पू.आ.श्रीहेमचन्द्रसूरीश्वरशिष्याः

प.पू.आ.श्रीकल्याणबोधिसूरीश्वराः

प्रकाशकः

श्री जिनशासन आराधना ट्रस्ट

મૂળ સૂત્ર : **જ્ઞાતાધર્મકથા**

ભાષા : **અર્ધમાગધી**

ગ્રંથાગ્ર : **૫૦૬૫**

મૂળ સૂત્રકાર : સર્વલબ્ધિનિધાન પંચમગણધર **શ્રીસુધર્માસ્વામી ભગવાન**

સારસંચય : **જ્ઞાતાધર્મકથોપનિષદ્**

ભાષા : **સંસ્કૃત**

સંચય + સંપાદન : પ્રાચીનશ્રુતોદ્ધારક પ.પૂ.આ.શ્રી **હેમચંદ્રસૂરીશ્વરજી** મહારાજાના શિષ્ય પ.પૂ.આ.શ્રી **કલ્યાણબોધિસૂરીશ્વરજી** મહારાજા

પઠન-પાઠનાધિકારી : ગુરુ-અનુજ્ઞાત શ્રમણ ભગવંતો


વિ. સં. ૨૦૬૮ • વી. સં. ૨૫૩૮ • સને ૨૦૧૨

પ્રથમ આવૃત્તિ • પ્રતિ : ૫૦૦

*No Copyright. • Reproduction Welcome.*

## ❀ પ્રાપ્તિસ્થાન ❀


### 1) શ્રી અક્ષયભાઈ શાહ

506, પદ્મ એપાર્ટ., જૈન દેરાસર સામે, સર્વોદયનગર,
મુલુંડ (પ.), મુંબઈ-400 080. મો.: 9594555505
Email : jinshasan108@gmail.com

### 2) શ્રી ચંદ્રકાંતભાઈ સંઘવી

6-બી, અશોકા કોમ્પલેક્સ, જનતા અસ્પતાલ પાસે,
પાટણ (ઉ.ગુ.) ફોન : 9909468572

### 3) મલ્ટી ગ્રાફિક્સ

18, Vardhaman Bldg., 3rd Floor, Khotachi Wadi,
Prarthana Samaj, V. P. Road, Mumbai – 4.
Ph.: 23873222 / 23884222.
E-mail : support@multygraphics.com


---

પ્રસ્તુત પ્રકાશન જ્ઞાનનિધિમાંથી થયેલ છે. માટે ગૃહસ્થો જ્ઞાનનિધિમાં તેનું મૂલ્ય અર્પણ કરીને માલિકી કરી શકશે.

*Website : www.divineKnowledge.org.in*

## चरमतीर्थपतिः करुणासागरः श्रीमहावीरस्वामी



# અનરાધાર અનુગ્રહ



## अनन्तलब्धिनिधानः श्रीगौतमस्वामी

## पञ्चमगणधरः श्रीसुधर्मास्वामी



# કૃપા વરસે અનરાધાર

સિદ્ધાંતમહોદધિ સુવિશાલગચ્છસર્જક પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મહારાજા**

વર્ધમાન તપોનિધિ ન્યાયવિશારદ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મહારાજા**

અજોડ ગુરુસમર્પિત ગુણગણનિધિ પ. પૂ. પંન્યાસપ્રવર
**શ્રી પદ્મવિજયજી ગણિવર્ય**

સિદ્ધાંત દિવાકર પ. પૂ. ગચ્છાધિપતિ આચાર્યદેવ
**શ્રીમદ્વિજય જયઘોષસૂરીશ્વરજી મહારાજા**

વૈરાગ્યદેશનાદક્ષ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજા**

## • પ્રકાશકીય •

કુશળ અધ્યાપકોની અધ્યાપનશૈલી એવી હોય છે, કે તેઓ પહેલા આખો પદાર્થ સમજાવી દે, પછી કહે, 'હવે ચોપડી ખોલો, ને વાંચો.' વાંચતા જઈએ ને જાણે વાર્તા હોય, એમ સમજાતું જાય. દુર્ગમ ગ્રંથ પણ સુગમ બની જાય.

આ જ શૈલી આગમ-અધ્યયનમાં પણ ઉપયોગી બને, એ માટે કુશળ અધ્યાપકની ગરજ સારે તેવી આ આગમ ઉપનિષદ્‌ની શ્રેણિ પ્રકાશિત કરતા રોમહર્ષ અનુભવીએ છીએ. અધિકારી સંયમી ભગવંતોનો આગમ-અભ્યાસ આ શ્રેણિ દ્વારા સુગમ બને... અને અભ્યાસ બાદ પણ આ વિહારોપયોગી પ્રકાશનના આલંબને દીર્ઘ કાળ સુધી આગમિક પદાર્થોના પરાવર્તન થતા રહે... આ ઉપહાર આપણને બહુશ્રુતોનો ઉપહાર આપે.. એવી સહજ સંવેદના થાય છે. વંદન... પરમ કૃપાળુ પરમાત્માને. વંદન... પૂજનીય શ્રીગણધર ભગવંતો આદિ પૂર્વાચાર્યોને. વંદન... આગમ અધ્યયનનું આ આલંબન આપનાર પૂજ્યશ્રીને.

લિ.

શ્રી જિનશાસન આરાધના ટ્રસ્ટ

ટ્રસ્ટીઓ

શ્રી ચંદ્રકુમાર જરીવાલા　　શ્રી પુંડરીકભાઈ શાહ

શ્રી લલિતભાઈ કોઠારી　　શ્રી વિનયચંદ્ર કોઠારી

## અસત્ થી સત્ તરફ

કથાના અંતે
ઉપનય હોય છે
એનો સાર
એ જ હોય છે
કે
કથામાં
જે સત્ તત્ત્વ છે
એનો સ્વીકાર કરો
ને
જે અસત્ તત્ત્વ છે
એનો પરિહાર કરો

કેટલી
સચોટ વાત !
દ્વાદશાંગીનો પણ
આ જ સાર છે ને ?

ચાલો,
લઈ લઈએ.

- આ. કલ્યાણબોધિસૂરિ

अथ

# ज्ञाताधर्मकथोपनिषद्

श्रीवर्द्धमानं जिनवर्द्धमानं
सूरीन्द्रमेवं गुरुहेमचन्द्रम्।
प्रणम्य नम्यं रमणीयरम्यं
षष्ठाङ्गसत्कं प्रचिनोमि सारम्॥

चम्पानगरी-पूर्णभद्रचैत्ये जात्यादि-सम्पन्न - श्रीसुधर्मस्वामिस्थविरसमवसरणम्। कोणिकराजादिपर्षदो धर्मकथनम्। श्रीजम्बूस्वामिपृच्छायां षष्ठाङ्गार्थकथनम्।

तद्यथा द्वावत्र श्रुतस्कन्धौ - ज्ञातानि च धर्मकथाश्च। आद्य उत्क्षिप्तज्ञाताद्यान्येकोनविंशत्यध्ययनानि।

अथ प्रथमः श्रुतस्कन्धः

## ज्ञातानि

(१) **उत्क्षिप्तज्ञातम्** - राजगृहे श्रेणिकराज - नन्दादेव्योः पुत्रोऽभयो राज्यधूश्चिन्तकः श्रेणिकस्य सर्वकार्यपृच्छनीयश्च। श्रेणिकस्य धारिणीदेव्या नभस्तलात् स्वमुखातिगतगजस्वप्नदर्शनम्। राज्ञो निवेदनम्। राज्ञा पुत्रादिलाभ-

प्रकाशनम्। प्रत्यूष उपस्थानशाला-संस्काराऽऽदेशः, व्यायामशालादिव्यतिकरः, स्वप्नपाठकादिव्यतिकरश्च (कल्पसूत्रवन्नेयः)। दारकभावि - राजा वा भाविताऽऽत्माऽनगारो वेति विशेषः।

तृतीयमासे धारिण्या अकालमेघदोहदः। पूर्वसङ्गतिकदेवं मनसि कुर्वताऽभयकुमारेण पौषधशालायामष्टमभक्तकरणम्। आसनचलनाभोगपुरस्सरं तत्प्रादुर्भावः। अभयकुमारप्रार्थनया वैभारपर्वते तेन पञ्चवर्णमेघनिनादोपशोभितदिव्य-

प्रावृषश्रीविकुर्वणम्। दोहदविनयनम्। गर्भानुकम्पनार्थं धारिण्या यतनया स्थानादिकरणम्, सुखंसुखेन गर्भपरिवहनं च।

पुत्रजन्म। नगरे दशदिनोत्सवः (कल्पसूत्रवत्)। दोहदानुसारेण मेघकुमार इति नामस्थापना। पञ्चधात्रीपरिगृहीतस्य मेघकुमारस्य सुखेन वर्धनम्, कलाग्रहणम्, अष्टराजकन्यापरिणयः, अष्टहिरण्यकोट्यादिस्वामित्वम्, अष्टप्रासादावतंसकमध्ये विलसनं च।

राजगृही - गुणशिलचैत्ये श्रीमहावीर-

जिनसमवसरणम्, मेघकुमारस्य तद्देशनाश्रुतेः प्रव्रज्याभिलाषः, मातापित्रन्तिके तदनुज्ञायाचना (भगवतीगतजमाल्यधिकारवत्)। मातापितृनिर्बन्धत एकदिवसराज्यश्रीस्वीकारः, प्रव्रज्यामहोत्सवः, प्रव्रज्या।

यथारात्निकं शय्यासंस्तारकेषु विभज्यमानेषु मेघकुमारस्य द्वारमूले शय्यासंस्तारकः। वाचनाद्यर्थमुच्चाराद्यर्थं च गमनादिप्रवृत्तैः श्रमणैर्हस्तादिभिस्तच्छीर्षादौ सङ्घट्टनम्, उल्लङ्घनादिकम्, पादरेणुगु-

ण्डितकरणञ्च। ततो मेघकुमारस्य सर्वरात्रि-मप्यक्षिनिमीलनाशक्यत्वम्।

ततस्तच्चिन्ता - गृहिपर्यायेऽहमादरा-दिभाक् श्रमणानाम्, अधुना त्वनाद-रादिभाक्, तत्सङ्घट्टादिना सर्वरात्रिमपि मम निद्राया अपि दौर्लभ्यम्, अतः श्रेयो मम कल्ये भगवन्तमापृच्छ्य गृहप्रतिगमनम् - इति। ततोऽप्यार्त्ततया नरकसदृशत-द्रात्र्यतिवाहनम्।

प्रातर्भगवदन्तिके गत्वा त्रिकृत्वः प्रदक्षिणीकृत्य वन्दित्वा नमस्कृत्य पर्युपा-

सनम्। भगवता स्वयं रात्रिव्यतिकर-तच्चिन्ताप्रकाशनपूर्वं तत्प्राग्भवकथनम्। तद्यथाऽतीततृतीयभवे वैताढ्यमूले सुमेरु-प्रभनामा षड्दन्तो गजराजः, दावानल-भीत्या प्रधावतस्तस्य पङ्कबहुलसरोऽवषण्णता, पूर्वविराधितकलभेन दन्त-प्रहारेण वैरनिर्यातनम्, दिनसप्तकं यावत्तीव्रव्यथामनुभूय मृत्वा विन्ध्यमूले मेरुप्रभ-नामचतुर्दन्तहस्तित्वेन जन्म, वनदवं दृष्ट्वा जातिस्मृतिः, तद्रक्षार्थं प्रथमवर्षानन्तरं स्वयूथेन सह गङ्गाकूले योजनप्रमाण-मण्डलकरणम्, तद्गततृणाद्यपनयनं च।

एवं मध्यमचरमवर्षानन्तरमपि द्वितीयं तृतीयं च वारं मण्डलघातनं तृणाद्यपनयनं च। ततः कदाचिद्दवानले समुत्थिते तस्यान्येषामपि सिंहादिप्राणिनां तन्मण्डल आगमनम्। गात्रकण्डूयनार्थं तस्य हस्तिनः पादोत्क्षेपणम्। तत्रान्यबलवत्प्राणिप्रनोद्य-मानशशकस्यानुप्रवेशः। जीवदयया तेनान्तरैव पादसन्धारणम्, अतः संसारपरित्तीकरणं मनुष्यायुर्बन्धश्च।

अर्धतृतीयादिनानन्तरं दवोपशमः सर्वप्राणिविप्रसारः, हस्तिनो विप्रसर्त्तुं पादं

प्रसारयतः सहसा निपातः, तीव्रवेदनस्य दिनत्रयानन्तरं मृत्युः, श्रेणिकसुततया धारिणीदेवीकुक्षौ प्रत्याजातिश्च।

एवं यदि सम्यक्त्वरत्नरहितेन तिर्यग्भूतेनापि त्वया जीवदयार्थं यावदन्तरैव पादः सन्धारितः, नैव तु निक्षिप्तः, तदेदानीं विपुलकुलोद्भवेन निरुपहतशरीरादि-सम्पन्नेन मदन्तिके प्रव्रजितेन तु सुतरां सहनीयं श्रमणसङ्घट्टादिकष्टमिति भगव-द्वचः श्रुत्वोत्पन्नजातिस्मरणस्य मेघकुमारस्य भगवद्वन्दनादिकरणं वदनं च यथा-

अद्यप्रभृति भदन्त ! ममाक्षिद्वयं मुक्त्वाऽवशिष्टः कायो निःसृष्टः श्रमणानां निर्ग्रन्थानामिति।

पुनरपि भगवद्वन्दनादिकरणम्। कथनं च - इच्छामि भदन्तेदानीं द्वितीयमपि स्वयमेव प्रव्राजितादि इति। भगवता तथाकरणम्।

मेघकुमारस्येर्यासमितत्वाद्यनगारवर्णकः, सामायिकाद्येकादशाङ्गाध्ययनम्, मासक्षपणादिबहुतपःकरणम्, भगवदनुज्ञयैकादशभिक्षुप्रतिमोपसम्पत्, सम्यक् तत्पा-

लनादि, गुणरत्नसंवत्सरतपःकरणम्, पुनरपि मासक्षपणादिबहुतपःकरणम्, एतेनोदारत्वादिविशिष्टतपसाऽत्यन्तशुष्कगात्रस्य यावत् सशब्दगमनम्, तपसुपचयः, मांसाद्यपचयः, तपस्तेजसाऽतीवोपशोभनं च।

अद्यापि यावदस्ति मम किञ्चिद् बलं तावद् भगवदनुज्ञया पञ्चमहाव्रतान्यारुह्य, गौतमादि श्रमणनिग्रन्थनिर्ग्रन्थीः क्षामयित्वा, स्थविरैः सह विपुलगिरिमारुह्य कृतसंलेखनस्य प्रत्याख्यातभक्तपानस्य पादपोपगमनं प्रतिपत्तुम् - इति धर्मजागरिकायां

मेघानगाराध्यवसायः। भगवदनुज्ञया तथाकरण्। स्थविरभगवद्भिरग्लान्या तद्वैयावृत्यकरणम्। समाधिना मासिकानशनेन कालकरणम्। स्थविरभगवद्भिः भगवदन्तिके गत्वा तद्व्यतिकरज्ञापनम्। श्रीगौतमस्वामिपृष्टेन भगवता तद्गतिप्रज्ञापनम्, यथा विजयविमाने ३३ सागरायुर्देवतयोत्पत्तिः, ततोऽपि विदेहे सिद्धिरित्याद्याध्ययनम्।

(२) **सङ्घाटकः** - राजगृहे नगरे धनसार्थवाहः, तस्य भद्रा भार्या। पुत्र-

प्राप्त्यर्थं नागवैश्रमणाद्युपयाचनम्। कदाचिद् गर्भधारणम्। पुष्करण्यवगाहनस्नानादिदोहदोद्भवः, तदपनयनम्, नागादिपूजा च। पुत्रजन्म, देवदत्तनामस्थापनम्। पन्थकनामदासचेटकेन सह सर्वालङ्कारविभूषितस्य तस्य डिम्भादिभिः सह रन्तुं गमनम्, विजयनामचौरेणालङ्कारलुब्धेन तदपहरणम्, एकान्ते त मारयित्वाऽलङ्कारग्रहणं च।

पन्थकस्य दारकमपश्यतो रूदनम्, धनसार्थवाहस्य निवेदनम्, तेन स्वयं

समन्ताद् गवेषणम्, तत्प्रवृत्तिमलभमानस्य महाप्राभृतदानपूर्वं नगरगुप्तिकैस्तदन्वेषणकारणम्, तैर्मृतकोपलब्धिः, धनसार्थवाहाय तद्दानम्, सजीवग्राहं विजयतस्करग्रहणम्, चारके तत्प्रक्षेपः, भक्तपाननिरोधः, त्रिसन्ध्यं कषाप्रहारनिपातश्च।

कदाचिद्राजापराधे धनसार्थवाहस्य विजयचौरेण सहैकबन्धन एव चारकनिरोधः। भद्रभार्यया पन्थकद्वारा तत्राशनादिप्रेषणम्। विजयेन तन्मार्गणम्। अपि काकादिभ्यो ददामि न तु पुत्रमारकाय

तुभ्यम् - इति तेन प्रतिषेधनम्। उच्चारादिबाधाकाले तस्यैकबन्धनबद्धतया विजयचौरसाहाय्यमार्गणम्, तेन प्रतिषेधनम्, पुनः प्रार्थितस्य संविभागमार्गणम्, धनेन तत्स्वीकरणम्।

द्वितीयदिने दृष्टतत्संविभागेन पन्थकेन भद्रायास्तन्निवेदनम्, तस्याः प्रद्वेषोदयः, कदाचिच्चारकमुक्ततया गृहाऽऽगतस्य तयाऽनादरकरणम्, 'न धर्मादिहेतोः, अपि तु शरीरचिन्तया तत्संविभागः' - इत्युक्ताया आश्वासः।

विजयस्तु चारके बन्धवधकषाघात-क्षुत्-तृषाभिः पराभूयमानः कालं कृत्वा नरकं गतः, ततोऽप्युद्वर्त्त्य भ्रमिष्यत्य-नन्तसंसारम्। एवं निर्ग्रन्थो निर्ग्रन्थी वाऽपि धनादौ लोभकरणेन भ्रमिष्यत्यनन्तसंसारम्।

धर्मघोषस्थविरदेशनाश्रुतेर्धनसार्थवाहस्य प्रव्रज्याभिलाषः, प्रव्रज्या, बहुवर्षश्रामण्य-पर्यायपालनम्, मासिकानशनेन कालं कृत्वा सौधर्मे पल्योपमचतुष्कायुर्देवतयो-त्पादः, ततश्च्युत्वा विदेहे सेत्स्यति।

जम्बू ! यथा धनेन न धर्माद्यर्थं

विजयस्य संविभागः कृतः, अपि तु शरीरसंरक्षणार्थम्, एवं यो निर्ग्रन्थो निर्ग्रन्थी वा न वर्ण-रूप-विषयार्थमाहारमाहारयति, अपि तु ज्ञानादिवहनार्थम्, स इहभवे बहुश्रमणादीनामर्चनीयो भवति। न स परलोके हस्तादिछेदनादिदुःखानि प्राप्नोति, अपि तु सिध्यति, धनसार्थवाहवदिति द्वितीयं ज्ञातम्।

(३) **अण्डकम्** - चम्पानगर्यां सार्थवाहपुत्रद्वयं सहजातमन्योऽन्यानुरक्तम्। देवदत्तागणिकया सार्धं तयोः सुभूमिभागस्यो-

द्यानस्य शोभां द्रष्टुं गमनम्। तत्राशनाद्याहारो गणिकाभोगश्च। ततस्तत्राटतोर्मयूराण्डकद्वयप्राप्तिः। तद्ग्रहणम्। स्वकीयकुर्क्कुट्यण्डकेषु स्थापनम्। एकेन विचिकित्सया पुनः पुनस्तच्चालनादिकरणम्। ततस्तदण्डकस्यासारतागमनम्। अन्यस्य निःशङ्कत्वम्, उद्वर्त्तनाद्यभावेन पोतजन्म, शिक्षाग्राहणम्, चम्पानगरीशृङ्गाटकादौ यावल्लक्षमानैः पणैर्जयप्राप्तिश्च।

एवं यो निर्ग्रन्थो निर्ग्रन्थी वा पञ्चमहाव्रतेषु यावत् षड्जीवनिकायेषु

निर्ग्रन्थे प्रवचने शङ्कादि कुरुते, स बहुश्रमणादीनां हीलनीयो भवतीह भवे, परलोके च प्राप्नोति बहु दण्डादि, यावद् भ्रमत्यनन्तसंसारम्। एवं निःशङ्कितस्य विपरीतमपि ज्ञेयमिति तृतीयम्।

(४) **कूर्मः** - वाणारस्यां मृतगङ्गा-तीरहृदः। तत्र बहुमत्स्यकच्छपादयः। तस्य समन्तात् कच्छपद्वयस्याहारार्थं भ्रमणम्। पापशृगालद्वयस्याऽऽमिषार्थं तत्राऽऽगमनम्। कच्छपद्वयस्य पादचतुष्कग्रीवाप्रतिसंहरणम् निश्चलावस्थानं च। तस्याबाधादि कर्त्तुं

शृगालयोरसामर्थ्यम्। श्रान्ततया तयोरेकान्ते गमनम्। एकेन कच्छपेनैकपादनिःसारणम्। क्षिप्रमेवागत्य शृगालाभ्यां नखैस्तदालुम्पनम्, दन्तैर्विदारणम्, तन्मांसशोणिताभ्यवहरणं च। एवं शेषपादानां ग्रीवायाश्चापि बोध्यो व्यतिकरः। द्वितीयस्तु कच्छपः सुगुप्ततया नाऽऽबाधादिगोचरीभूतः।

एवं यस्य निर्ग्रन्थादेः पञ्चेन्द्रियाण्यगुप्तानि, स इहापि बहुश्रमणादीनामित्यादि प्राग्वत्। एवं विपरीतसूत्रमपि। इति तुर्यम्।

(५) **शैलकः** - द्वारिकायां थावच्चा-

पुत्रः, ३२ इभ्यकन्यापरिणयः, ३२ हिरण्यकोट्यादिस्वामित्वम्, श्रीनेमिनाथसमवसरणम्, कृष्णादेशतः सुधर्मसभागतभेरीशब्दतः दशार्हादिसमस्तपरिवारस्य तदन्तिके प्रादुर्भवनम्, सपरिवारं कृष्णस्य भगवदन्तिके गमनम्।

मेघवत् थावच्चापुत्रस्यापि गमनम्। देशनाश्रुतेर्भवनिर्वेदोदयः। अनुज्ञायाश्चादि प्राग्वत्। तन्मात्रा निष्क्रमणोत्सवार्थं कृष्णपार्श्वे छत्रादियाचनम्। स्वयमहं करिष्यामि तन्निष्क्रमणोत्सवमित्युक्त्वा कृष्णस्याऽऽ-

गमनम्। कामभोगैस्तदुपमन्त्रणम्। त्वदुपरिष्टाद् गच्छन्तं वायुकायं मुक्त्वाऽन्यद् यत् किञ्चिदपि त आबाधाद्युत्पत्स्यते, तत् सर्वं निवारयिष्याम्यहमिति तद्वचः श्रुत्वा थावच्चापुत्रस्य प्रतिवचः- यदि मम मृत्युं जरां वा निवारयसि, तदोरीकुर्वे त्वद्वचः।

न देवेनापीदं शक्यम्, अन्यत्र स्वकर्मक्षयतः - इति कृष्णवचः श्रुत्वा तत्प्रतिवचः - तदिच्छामि देवानुप्रिय ! अज्ञानादिसञ्चितस्वकर्मक्षयं कर्त्तुमिति।

एवमुक्तेन श्रीकृष्णेन द्वारिकायां

घोषणाकारापणम्, यथा संसारभयोद्विग्नः, प्रव्रजति थावच्चापुत्रः, अन्योऽपि यो राजादिस्तमनुप्रव्रजति, तमनुजानाति कृष्ण-वासुदेवः, प्रतिवहति च तद्दुःस्थपरिवार-निर्वाहम् - इति।

ततः थावच्चापुत्रानुरागेण पुरुषसहस्रं प्रव्रजितुमपस्थितम्। स्वयं कृष्णेनोत्सव-करणम्, सर्वेषां प्रव्रज्या, थावच्चापुत्रा-नगारस्य चतुर्दशपूर्वाध्ययनम्, बहुमास-क्षपणादितपःकरणम्, भगवता तदनुप्रव्र-जितानगारसहस्रस्य तच्छिष्यत्वेन दानम्,

भगवदनुज्ञया मुनिसहस्रसमेतस्य तस्य बहिर्विहारः।

शैलकपुरे शैलकराज्ञः पन्थकप्रमुख-पञ्चमन्त्रिशतसमेतस्य थावच्चापुत्रदेशनां श्रुत्वा गृहिधर्मप्रतिपत्तिः।

सौगन्धिकानगर्यां शुकपरिव्राजक-पार्श्वात् प्रतिपन्नशौचमूलधर्मस्य सुदर्शन-श्रेष्ठिनः थावच्चापुत्रान्तिके सप्रमाणं विनय-मूलधर्मश्रुतिः, न सरुधिरवस्त्रं रुधिरेण शुध्यतीति न सम्यगप्कायादिहिंसायुतो धर्म इत्यवगमः, श्रमणोपासकधर्मप्रतिपत्तिश्च।

स्वधर्मे तत्पुनःस्थापनार्थं तद्गृहे शुकपरिव्राजकाऽऽगमनम्, तेन तदनादर-करणम्, तद्धेतुप्रश्ने स्वप्रतिपन्नधर्मज्ञापनम्, थावच्चापुत्रस्यान्तिके हेत्वादिपृच्छार्थं स-सुदर्शनस्य परिव्राजकसहस्रपरिवृतस्य शुकस्य गमनम्, यात्रा-यापनीयादिस्वरूप-प्रश्नाः सरिसवादिगोचरप्रश्नाश्च तेन पृष्टाः (ते श्रीवीरान्तिके पृष्टाः सोमिलप्रश्ना इव ज्ञेयाः)।

तदुत्तरश्रवणसम्बुद्धस्य शुकपरिव्राज-कस्य केवलिप्रज्ञप्तधर्मश्रुतीच्छा, तच्छ्र-

वणम्, प्रव्रज्या, चतुर्दशपूर्वाध्ययनम्, थावच्चापुत्रानगारेण तदनुप्रव्रजितानगार-सहस्रस्य तच्छिष्यतया दानम्।

अन्यदा कदाचिदनगारसहस्रेण सह थावच्चापुत्रस्य पुण्डरीकगिरौ मासिकान-शनेन केवलवरज्ञानदर्शने समुत्पाद्य सिद्धिः।

अन्यदा कदाचिच्छैलकपुरे शुकमुने-रागमनम्। तद्देशनां श्रुत्वा मण्डुक-कुमारराज्याभिषेकं कृत्वा पन्थकप्रमुख-पञ्चमन्त्रिशतयुतस्य शैलकस्य प्रव्रज्या-ग्रहणम्, एकादशाङ्गाध्ययनम्, बहुमास-

क्षपणादितपःकरणम्, शुकानगारेण तदनु-प्रव्रजितपञ्चशतानगाराणां तच्छिष्यतया दानम्।

अन्यदा कदाचिन्मुनिसहस्रपरिवृतस्य शुकानगारस्य पुण्डरीकपर्वते यावत् सिद्धिः।

राजर्षिशैलकस्यान्तप्रान्ताद्याहारेण दाहादिदुःषहरोगोदयः। कदाचिच्छैलकपुरोद्यान आगमनम्। मण्डुकराज्ञा यथाप्रवृत्तौषधादिप्रतिलाभार्थं स्वयानशालायां समवसरणार्थं विज्ञप्तिः। शैलकराजर्षिणा तदुरीकारः। राजाऽऽदिष्टवैद्यैश्चिकित्साकरणं

मद्यपानोपदेशश्च। तत उपशान्तरोगस्याप्य-शनादौ मद्यपाने च मूर्च्छितस्य तस्याव-सन्नविहारित्वगमनम्, तत्रैव वासश्च।

पन्थकवर्जपञ्चश्रमणशतानां शैलक-राजर्षिमाऽऽपृच्छ्य पन्थकं तद्वैयावृत्त्यक-रतया स्थापयित्वा विहारः। पन्थकेना-ग्लान्या गुरुवैयावृत्यकरणम्।

कार्त्तिकचातुर्मास्यां प्रतिक्रमणे क्षमा-पनार्थं पन्थकेन शीर्षेण शैलकपादे सङ्घट्टः, विपुलाशनादि- मद्यपानाभ्यव-हरणानन्तरं सुखप्रसुप्तस्य तस्य निद्राच्छेदः,

रोषः, क्षमन्तु देवानुप्रिया ! ममैतदपराधमिति सद्भावज्ञापनपुरस्सरं पन्थकेन सम्यग् विनयेन भूयो भूयः क्षमापनाकरणम्, शैलकस्य स्वप्रमादगोचरोऽनुतापः, अभ्युद्यतविहारप्रतिपत्तिः ।

पन्थकवर्जपञ्चानगारशतानामपि शैलकराजर्ष्युसम्पत्। बहुवर्षश्रमणपर्यायं परिपाल्य पुण्डरीकपर्वते सिद्धिः थावच्चापुत्रवत्।

एवमवसन्नविहारिणो हीलनीयता संसारश्च, इतरस्य तु पूजनीयता सिद्धिश्चेति

ज्ञेयम्। इति पञ्चमम्।

(६) **तुम्बकम्** - श्रीगौतमस्वामिपृच्छायां गुरुत्व-लघुत्वगोचर-भगवदुत्तरम् - यथाऽष्टमृत्तिकालेपलिप्तं तुम्बकमस्ताघोदके क्षिप्तं सदधो धरणीतलप्रतिष्ठानं भवति, गुरुकत्वात्, तथा जीवा अपि प्राणातिपातेन यावन्मिथ्यादर्शनशल्येनाष्टकर्मप्रकृतिरुपार्ज्य कालं कृत्वाऽधो नरकतलप्रतिष्ठाना भवन्ति, गुरुकत्वात्, भारिकत्वाच्च।

एवं परिशटितलेपतयोन्नमनं तुम्ब-

कस्य, तदुपनयश्च बोध्यः। इति षष्ठम्।

(७) **रोहिणी** - राजगृहे धन-सार्थवाहः, तत्स्नुषाचतुष्कम् - उज्झिका, भोगवती, रक्षिका, रोहिणी। गुणपरीक्षार्थं ताभ्यः श्वसुरेण पञ्चशाल्यक्षतदानम्, तत्संरक्षणार्थं याचने प्रतिदानार्थञ्च कथनम्। आद्ययोज्झनम्, पञ्चसंवत्सरान्ते याचयित्वा तस्या रोषपूर्वं कचवरोज्झने बहिःप्रेषणादौ च नियोजनम्। द्वितीयया भक्षणम्, तस्या महानसे रन्धनादौ नियोगः। तृतीयया सम्यग् रक्षणम्, तस्या धनादिभण्डारे नियोगः,

चतुर्थ्या कुलगृहपुरुषैः पुनः पुनर्वपनेन बहुकुम्भशतशालिनिष्पादनम्, हर्षपूर्वं तस्या बहुकार्येषु प्रमाणभूततया स्थापनम्।

एवं निर्ग्रन्थादिरपि यदि पञ्चमहाव्रतान्युज्झति, तदा स बहुश्रमणादीनामित्यादि प्राग्वत्। यदि तूपजीवति पञ्चमहाव्रतान्याहाराद्यासक्तः, स बहुश्रमणादीनां हीलनीय इत्यादि प्राग्वत्। एवं रक्षण-संवर्धनपरयोर्विपरीतमपि ज्ञेयम्। इति सप्तमम्।

(८) **मल्लिः** - जम्बूद्वीप-विदेहे

सलिलावतीविजये वीतशोका राजधानी, तस्यां बलराज-धारिणीदेव्योः पुत्रो महाबलः, पञ्चराजकन्याशतपरिणयः, स्थविरभगवदन्तिके धर्मं श्रुत्वा बलराज्ञः प्रव्रज्याग्रहणं यावत् सिद्धिः। महाबलराज्ञः षड् राजानोऽचलादयो बाल्यकालान् मित्राणि।

स्थविरान्तिके सप्तकस्यापि प्रव्रज्या, महाबलस्यैकादशाङ्गाध्ययनम्, बहुमासक्षपणादितपःकरणं च। योऽस्माकमेकस्तपः कुर्यात्, तत्सर्वैरपि कर्त्तव्यमिति सप्तान-

गाराणामन्योऽन्यः सङ्गारः। महाबला-नगारस्य तत्सङ्गारभङ्गपूर्वमधिकतपः करणम्, तत्प्रत्ययिकः स्त्रीनामगोत्रकर्म-बन्धश्च। अर्हदादिविंशत्याराधनाभिस्तीर्थ-कृन्नामबन्धश्च।

सप्तानामपि मासिकादिभिक्षुप्रतिमोप-सम्पत्, क्षुल्लकसिंहनिष्क्रीडिततपः-महत्सिंहनिष्क्रीडिततपः - बहुचतुर्थादि-तपःकरणम्, मासद्वयानशनपूर्वं ८४ लक्ष-वर्षश्रामण्यपर्यायं परिपाल्य ८४ लक्ष-पूर्वसर्वायुः परिपाल्य जयन्तविमान उप-

पादः। तत्र ३२ सागरायुर्महाबलर

शेषाणां तदेव देशोनम्।

महाबलवर्जदेवषट्कस्य जम्बूद्वी
भरते प्रत्येकं राजकुलेषु प्रतिबुद्ध्यां
नामराजकुमारतयोत्पत्तिः। महाबल
मिथिलायां कुम्भराज्ञः प्रभावतीदेवीकु
गर्भतया व्युत्क्रान्तिः। १४ स्वप्नदर्शन
स्वप्नपाठकादिव्यतिकरः। मासत्रये प्रतिप
माल्यदोहदः। सन्निहितव्यन्तरैस्तत्पूरण
काले १९तमतीर्थकृज्जन्म। जन्मोत्सव
दोहदानुसारेण मल्लिनामस्थापना।

यौवनप्राप्तिः। राजषट्कस्यावधिना-ऽऽभोगः। षड्गर्भगृहयुतमोहनगृहकारापणम्। तन्मध्ये स्वकीयस्वर्णप्रतिमास्थापनम्। पद्मपिहिततन्मस्तकच्छिद्रे प्रतिदिनं स्वभोजनमध्यादेकपिण्डस्य प्रक्षेपः, अहि-मृतकादेरप्यनिष्टतरगन्धप्रादुर्भावः।

पृथक् पृथक् कारणाद्राजषट्कस्य मल्लिराजकन्यापरिज्ञानम्। तद्वरणार्थं दूत-प्रेषणम्। कुम्भराज्ञा दूतषट्कस्यापमान-नमपद्वारेण निष्कासनं च। राजषट्कस्य कुम्भराज्ञा सह युद्धम्। अबलस्य कुम्भराज्ञो

मिथिलानुप्रवेशः, द्वारपिधानं च। राज-षट्केन नगरीरोधः।

युक्त्या राजषट्कं मोहनगृह आकार्य तस्य प्रतिमायां मल्लिभ्रान्तौ वर्तमानायां मल्लिराजकन्यया पद्मपिधानापनयनम्। तद्-गन्धाभिभूतानां राज्ञामुत्तरीयेणाऽऽस्यपि-धानपुरस्सरं पराङ्मुखीभवनम्। मल्लिराज-कन्यया तज्ज्ञातेनौदारिकदेहाशुचिभाव-ख्यापनपुरस्सरं वैराग्योपदेशः, प्राग्भाव-स्मारणं च।

राजषट्कस्य जातिस्मरणज्ञानोत्पादः,

मल्लिकुमारीवचनात् प्रव्रज्याभिलाषः। मल्लिजिनस्य सांवत्सरिकदानान्ते निष्क्रमणोत्सवः, यावद्दीक्षादिन एव कैवल्योत्पादः, देशना, कुम्भराज-प्रभावतीदेव्योर्गृहिधर्मप्रतिपत्तिः, राजषट्कस्य प्रव्रज्या, चतुर्दशपूर्वाध्ययनम्, यावत् सिद्धिः। मल्लिजिनस्य २८ गणा गणधराश्च भिषक्-प्रमुखा इत्यादिपरिवारो यावत् सम्मेतशैल-शिखरे ५०० आर्याआभ्यन्तरपर्षत् + ५०० श्रमण-बाह्यपर्षत्परिवृततया मासिकानशनेन सिद्धिः। इत्यष्टमम्।

(९) **माकन्दी** - चम्पानगर्यां माकन्दीसार्थवाहः, भद्रा भार्या, पुत्रद्वयम् - जिनपालितः, जिनरक्षितश्च। द्वयस्याप्येकादशकृत्वो लवणसागरावगाहनं वाणिज्यं च। ततोऽपि बलात् पितरावनुज्ञाप्य पोतवहनेन द्वादशमवारं लवणसागरावगाहनम्, अनेकयोजनशतावगाहनानन्तरं पोतभङ्गः, फलकावलम्बनेन रत्नद्वीप आगमनम्। तद्वासिनी पापिणी देवता। तया भोगनिमन्त्रणम्, प्रतिषेधे शिरच्छेद्बिभीषिकादर्शनम्, ताभ्यां तदाज्ञाप्रतिपत्तिः,

अशुभपुद्गलापहारपूर्वं शुभपुद्गलान् प्रक्षिप्य देवतया तदुपभोगः, प्रतिदिनममृतफलदानं च।

सकृत् लवणसमुद्रे कचवरादिशुद्ध्यर्थं गच्छन्त्या दक्षिणदिक्स्थितवनगमनप्रतिषेधकरणम्, तत्र दृष्टिविषसर्पबिभीषिकादर्शनं च।

भवितव्यमेतत्प्रतिषेधकारणान्तरमिति मत्वा द्वयस्य तत्र गमनम्। अहिमृतकादेरप्यनिष्टतरगन्धेनाभिभवः, अनेकशतास्थिकराशिदर्शनम्, महावधस्थानदर्शनम्,

शूलातिगततया करुणविलापकृत्पुरुष-दर्शनम्, तेन स्वपरिचयज्ञापनम्, यथा-काकन्दीनगरीतोऽहमश्ववणिक् पोतभङ्गेन फलकद्वाराऽत्राऽऽगतः, रत्नद्वीपदेवता मां गृहीत्वा भोगान् भुञ्जाना विहरति, कदाचिल्लघ्वपराधे परिकुपिता मामेतामापदं प्रापयति, न ज्ञायते युवयोरपि का भविष्यत्यापदिति।

ततो भीतयोस्तयोरुपायज्ञानम्, यथा-पूर्वतनवनषण्डे शैलकयक्षायतनम्, तत्राश्वमुखधरः शैलकयक्षः, स चतुर्दश्यादौ

महच्छब्देन वदति, कं तारयामि कं पालयामीति। अतो यूयमपि तत्र गत्वा पुष्पार्चनं कृत्वा, प्राप्तकाले यदा स एतद्वचो वदेत्, तदाऽऽवां तारयाऽऽवां पालय- इति वदतम्, ततो निस्तारयिष्यति स यूवां लवणसागरम्- इति।

द्वयेन तदर्चनम्, यक्षेण निस्तारण-स्वीकारः, देवताकृतप्रतिलोमानुलोमोपसर्गे यद्यादरः कृतस्तस्याः, तदा विधुनयिष्यामि मत्पृष्ठतो यूवाम्- इति यक्षोक्तिः। त्वदा-ज्ञाव्यवस्थिता वयमिति भ्रातृद्वयप्रत्युक्तिः।

वैक्रियसमुद्धातेन विकुर्विताश्वरूपस्य यक्षस्य पृष्ठे द्वयस्यारोहणम्, उत्कृष्टगत्या अश्वस्य चम्पां प्रति प्रस्थानम्, अवधिना ज्ञातव्यतिकराया देवताया कोपपुरस्सरमसिं गृहीत्वाऽऽगमनम्।

बिभीषिकां श्रुत्वाऽपि द्वयस्य तदनादरकरणम्, अनुलोमोपसर्गे जिनरक्षितस्य रागोदयः, पृष्ठतः सलज्जं तदवलोकनम्, यक्षेण तद्विधूननम्, देवतयाऽसिना तत्खण्डाखण्डिकरणम्।

जिनपालितस्यानुलोमप्रतिलोमोपसर्ग-

निपातेऽपि तदनादरः, श्रान्ततया तत्प्रतिगमनं च।

जिनपालितस्य चम्पानगरीप्राप्तिः, सशोकं जिनरक्षितस्य मृतकृत्यकरणम्, अन्यदा श्रमणभगवन्महावीरस्य चम्पायां समवसरणम्, धर्मं श्रुत्वा जिनपालितस्य प्रव्रज्या, एकादशाङ्गाध्ययनम्, मासिकानशनेन कालं कृत्वा सौधर्मे सागरद्वयायुर्देवतयोत्पादः, ततश्च्युत्वा विदेहे सेत्स्यति।

एवं विषयापेक्षिणः छलिता भवन्ति,

निरपेक्षास्त्वविघ्नेन गच्छन्ति। भोगाभि-लाषिणो घोरे पतन्ति संसारसागरे जिनरक्षितवत्। तन्निरपेक्षास्तु तरन्ति संसारकान्तारम्, जिनपालितवत्। इति नवमम्।

(१०) **चन्द्रः** - कथं जीवानां वृद्धिर्हानिर्वेति गौतमस्वामिपृच्छायां भगवदुत्तरम् - यथा कृष्णपक्षे प्रतिपच्चन्द्रः पूर्णिमाचन्द्रं प्रणिधाय वर्णादिभिर्हीनः, द्वितीयाचन्द्रश्च प्रतिपच्चन्द्रं प्रणिधाय, एवं यावदमावास्याचन्द्रश्चतुर्दशीचन्द्रं प्रणिधाय

नष्टो वर्णादिना, एवं निर्ग्रन्थादिरपि प्रव्रजितः सन् क्षान्त्यादिना हीनः, ततोऽपि हीनतरः, एवं यावन्नष्टो भवति क्षान्त्यादिभिः।

एवं वृद्धिसूत्रमपि नेयम्, इति दशमम्।

(११) **दावद्रवः** - कथं जीवा आराधका विराधका वेति गौतमस्वामिप्रश्ने भवगदुत्तरम् - एकस्मिन् समुद्रकूले दावद्रववृक्षाः, तत्समूहः स्वभावतो (१) द्वीपवायुभिर्बहुतरदेशेऽनुभवति स्वसम्पत्, देशेन चासमृद्धिम्। (२) समुद्रवायुभिश्च देशैरसमृद्धिं देशेन च समृद्धिम्। (३)

उभयवाय्वभावे समृद्ध्यभावः। (४) उभयसद्भावे सर्वतः समृद्धिः।

एवं (१) कुतीर्थिकगृहस्थानां दुर्वचनान्यसहमानः क्षान्तिप्रधानमोक्षमार्गस्य देशतो विराधकः, श्रमणादीनां बहुमानविषयाणां दुर्वचनादिक्षमणेन बहुतरदेशानामाराधनात्। (२) एतद्विपरीतस्तु देशाराधकः। (३) उभयासहनः सर्वविराधकः (४) सर्वसहनः सर्वाराधकः। इत्येकादशमम्।

(१२) **उदकम्** - चम्पानगरी,

जितशत्रुराज्ञा, सुबुद्धिमन्त्री, दुरभिसुरभिजलद्वयेऽपि समभावमस्य दृष्ट्वा राज्ञ आश्चर्यम्, दुरभिगन्धा अपि पुद्गलाः सुरभिगन्धतया, इतरे चेतरतया परिणमन्तीति तदुत्तरानादरश्च राज्ञः।

जिनोक्तभावश्रद्धानं भवतु राज्ञ इत्यभिप्रायेण दुरभिपरिखोदकस्य सुबुद्धिना सप्तकृत्वो घटनवकप्रयोगेण शुद्धीकरणम्, तत्संस्करणम्, राज्ञ उपनयनम्, विस्मितस्य सद्भावख्यापनम्। ततोऽपि सुबुद्धितो ज्ञातजिनधर्मस्य तस्य गृहिधर्मप्रतिपत्तिः

सुबुद्ध्यन्तिके। अन्यदा द्वयस्यापि स्थविर-भगवदन्तिके प्रव्रज्या, ११ अङ्गाध्ययनम्, यावत् सिद्धिः। इति द्वादशम्।

(१३) **दर्दुरः** - राजगृहे गुणशिलचैत्ये श्रीवीरसमवसरणम्, सौधर्माद् दर्दुरदेवस्यागमनम्, सूर्याभवद् भक्तिनाट्यं दर्शयित्वा प्रतिगमनम्। गौतमस्वामिपृच्छायां भगवता तत्प्राग्भवज्ञापनम्, यथा- राजगृहे नन्द-मणिकारश्रेष्ठी, मदुपदेशतो गृहिधर्मस्वीकारः, अन्यदा साधुदर्शनाद्यभावतो मिथ्यात्वगमनम्, कदाचिद् ग्रीष्मसमये

प्रतिपन्नाष्टमभक्तस्य पौषधशालास्थितस्य क्षुत्तृड्बाध्यमानस्य पुष्करिणीकारापण-विचारः, राजानुज्ञया तथाकरणम्, चतुर्दिक्षु वनषण्डरोपणम्, तेषु चित्रसभा महानस-शाला-चिकित्साशाला-अलङ्कारशाला-कारापणम्। एवं बहुजनोपकारेण लोक-कृतस्वप्रशंसां श्रुत्वा तद्धर्षः।

अन्यदा तच्छरीरे १६ रोगप्रादुर्भावः, वैद्यानां तदपनयनेऽसामर्थ्यम्, आर्त्तध्याने मृतस्य स्वकारापितपुष्करिण्यां दर्दुरतयो-त्पादः। लोकमुखेन नन्दमणिकारप्रशंसां

श्रुत्वा तस्य जातिस्मरणज्ञानोत्पादः, अनुतापः, पञ्चाणुव्रतस्वीकारः, यावज्जीवं षष्ठतपःप्रतिपत्तिः, पारणकेऽप्यप्रासुकत्यागः पुष्करिणीपर्यन्तवर्त्तिस्नानोदकादिना वृत्तिकल्पनम्।

अन्यदा बहुजनान्तिके भगवत्समवसरणं ज्ञात्वा वन्दनाद्यर्थं राजमार्ग उत्कृष्टया दर्दुरगत्या गच्छतः श्रेणिकस्यैकाश्वकिशोरस्य वामपादेनाऽऽक्रान्तिः, एकान्तमपक्रम्य भगवद्वन्दनपुरस्सरं सर्वप्राणातिपातादिप्रत्याख्यानम्, चरमोच्छ्वासैः

शरीरमपि व्युत्सृजामीति कृताराधनस्य कालं कृत्वा सौधर्मे दर्दुरावतंसकविमाने दर्दुरदेवतयोत्पत्तिः, ४ पल्यायुः, च्युत्वा विदेहे सेत्स्यति। इति त्रयोदशमम्।

(१४) **तेतलिपुत्रः** - तेतलिपुरे कनकरथराजा, पद्मावतीदेवी, तेतलिपुत्रोऽमात्यः तद्भार्या मूषिकारधूता पोट्टिला।

राज्ञा राज्यादिमूर्च्छिततया जातमात्राणां पुत्राणां हस्तादिच्छेदनम्। देव्यास्तेतलिपुत्रस्य पुत्ररक्षणार्थं कथनम्। देव्या पोट्टिलायाश्चैककाल एव गर्भधारणम्,

पोट्टिलाप्रसूतमृतदारिकाया राजपुत्रेण सह परावर्त्तकरणम्, राजपुत्रस्य रहसि संरक्षणम्। राज्ञा मृतदारिका जातेति मत्वा तदुत्तर-कृत्यकरणम्, राजपुत्रस्य कनकध्वजनाम-स्थापना, तद्यौवनप्राप्तिश्च।

कदाचित् स्वभर्त्रनिष्टतागमनं पोट्टि-लायाः, श्रमण्युपदेशेन गृहिधर्मस्वीकारः, अन्यदा पत्यन्तिके प्रव्रज्यानुज्ञायाञ्चा, कालं कृत्वा देवलोकादागत्य यदि मां सम्बोध-यिष्यसि तदा विसर्जामि - इति तेतलि-पुत्रवचः प्रतिपद्य सुव्रताऽऽर्यापार्श्वे प्रव्रज्या,

११ अङ्गाध्ययनम्, मासिकानशनेनान्यतरदेवलोकेषु देवतयोत्पादः।

इतो राजमरणम्, कनकध्वजकुमारस्य राज्याभिषेकः, उपकारितया तेतलिपुत्रस्य महान् राजकृतः सत्कारादिः।

इतः पोट्टिलदेवस्य बहुप्रयत्नैरपि तेतलिपुत्रस्यासम्बोधः। यावद्राजसत्कारादिस्तावदस्यासम्बोध इति मत्वा राजप्रभृतिसर्वानादरपात्रीकरणपम्, भीततया विषभक्षणादिनाऽऽत्ममारणप्रवृत्तस्य तेतलिपुत्रस्य सर्वोपायविफलीकरणम्, ततः

प्रकटीभूय तत्सम्बोधनम्, तेतलिपुत्रस्य जातिस्मरणोदयः, यथा महाविदेहे पुष्कलावतीविजये पुण्डरीकिणीराजधान्यामहं महापद्मराजा, प्रव्रज्या, १४पूर्वाध्ययनम्, मासिकानशनेन कालं कृत्वा महाशुक्रे देवत्वम्, ततोऽत्र तेतलिपुत्रः - इति, प्रव्रज्याभिलाषः, स्वयमेव पञ्चमहाव्रतोरीकारः, अनुचिन्तनेन १४पूर्वस्मृतिः, कैवल्योदयश्च।

राज्ञः सपरिवारस्याऽऽगमनम्, वन्दनादि कृत्वा क्षमापना, धर्मकथा, राज्ञः

श्रावकधर्मप्रतिपत्तिः, बहुवर्षकेवलिपर्यायं परिपाल्य तेतलिपुत्रकेवली यावत् सिद्धः। इति चतुर्दशम्।

(१५) **नन्दीफलम्** - चम्पानगरी, धनसार्थवाहः, बहुचरकादीनामवष्टम्भदान-पुरस्सरमहिच्छत्रापुरीं प्रति प्रस्थानम्। अङ्गदेशाग्रे घोषणाकारापणम्- अग्रेऽटव्यां नन्दिफलवृक्षाणां मूलाद्याहारस्तच्छाया-विश्रामश्चाऽऽपातभद्रकः, पश्चात् परिणम-माणस्त्वकाल एव जीविताद् व्यपरोपयति, अतस्तान् दूरेण परिहृत्य विश्राम्यत - इति।

तच्छ्रद्दधतामापातो न भद्रकः, पश्चात्तु सुखरूपतया भूयो भूयः परिणतिः, इतरेषां त्वापातो भद्रकः, पश्चात्तु मरणम्।

एवं यो निर्ग्रन्थादिः पञ्चकामगुणेषु न रज्यति सोऽर्चनीयो यावत् सिद्धिः, इतरस्य तु हीलना यावत् संसारः।

वाणिज्यं कृत्वा धनस्य प्रतिगमनम्। अन्यदा स्थविरान्तिके धर्मं श्रुत्वा प्रव्रज्या, ११अङ्गाध्ययनम्, मासिकानशनेन कालं कृत्वाऽन्यतरदेवलोकेषु देवतयोत्पादः, च्युत्वा विदेहे सेत्स्यति। इति पञ्चदशमम्।

युर्नारकतयोत्पादः, पुनः मत्सीभूय तथैव सप्तमपृथ्व्यां ३३ सागरायुर्नारकतयोत्पादः, पुनर्मत्स्यः, पुनः षष्ठपृथ्व्याम्, एवं गोशालवन् नेयं यावद्रत्नप्रभायाम्, ततोऽपि खेचरेषु यावत् खरबादरपृथ्वीकायिकेष्वनेकलक्षकृत्वः।

ततो जम्बूद्वीप-भरते चम्पायां सागरदत्तसार्थवाह-भद्रासुता सुकुमालिका, असिपत्र-मुर्मुरादेरप्यनिष्टतरं तत्स्पर्शमनुभूय विवाहरात्रावेव गृहजामातृभूतपतेः स्वगृहगमनम्, मरिष्यामि गिरिपतनादिना न तु

पुनरागमिष्यामीति श्वसुरं प्रति वदनम्। एवं तत्पतितयोपनीतस्य द्रमकस्यापि पलायनम्।

सुकुमालिकाया गोपालिकाऽऽर्यापार्श्वे प्रव्रज्या, बहुचतुर्थादितपःकरणम्, गुरुवचोऽनादृत्योद्यानसमीपे षष्ठतपःपूर्वमातापनम्, पञ्चपुरुषभुज्यमानदेवदत्तागणिकादर्शनम्, तादृशभोगावाप्त्यै निदानकरणम्, शरीरबकुशभावगमनम्, हस्तादिक्षालनस्याभीक्ष्णं निषेधं श्रुत्वा पृथग्वसतौ गमनम्, स्वच्छन्दविहरणम्, १५दिनसंलेखनया-

भ्राता कृष्णवासुदेवः, स चेत् षण्मासाभ्यन्तरे मत्पार्श्वे नाऽऽगमिष्यति, तदा प्रतिपद्ये त्वदाज्ञामिति द्रौपद्या कालक्षेपकरणम्, षष्ठतपःकरणम्, पारणक आचाम्लपरिग्रहः।

द्रौपदीमन्वेष्टुमसमर्थेण पाण्डुराज्ञा कुन्तीं सम्प्रेष्य कृष्णवासुदेवसाहाय्ययाचनम्, नारदवचसा तत्प्रवृत्तिं प्राप्य कृष्णस्य पञ्चपाण्डवैः सह तत्र गमनम्।

दूतप्रेषणम्, दूतस्यापमाननम्, युद्धार्थं पद्मनाभस्याऽऽगमनम्।

प्रथमं पाण्डवा योद्धुं गताः, वयं वा पद्मनाभो वेति तत्प्रतिज्ञा, क्षिप्रमेव तेषां पराभवः। ततोऽहं न पद्मनाभराजा - इति प्रतिज्ञाय कृष्णस्य गमनम्। तत्पूरित-पाञ्चजन्यशङ्खशब्दतो पद्मनाभबलत्रि-भागहननम्, धनुःशब्दतः द्वितीयत्रिभाग-बलहननम्, शेषत्रिभागेन सह पद्मनाभस्य पुर्यां पलायनम्,द्वारपिधानं च, नरसिंहरूपं विकुर्व्य महच्छब्दैः पाददर्दरकरणम्, तेना-परकङ्कासत्कप्राकारभवनादिसम्भङ्गः, पद्मनाभस्य द्रौपदीशरणस्वीकारः, तद्वचसा स्नात्वा परिहितार्द्रवस्त्रस्य, सपरिवारस्य

भगवन्नेमिनाथस्य सुराष्ट्रे समवसरणं श्रुत्वा स्थविरानापृच्छ्य पाण्डवानां भगवद्वन्दनार्थं प्रस्थानम्, अनिक्षिप्त-मासक्षपणतपःपरिग्रहः, हस्तकल्पे नगरे युधिष्ठिरवर्जमुनि-चतुष्कस्य मासक्षपण-पारणके भिक्षार्थमटत उज्जयन्तगिरौ भगवन्निर्वाणमभूदिति लोकमुखाच्छ्रवणम्, प्रत्यावृत्य पूर्वग्रहीतभक्तपाने परिष्ठाप्य पञ्चानामपि शत्रुञ्जयगिरौ गत्वा द्विमासि-कसंलेखनापुरस्सरं कैवल्यमुत्पाद्य यावत् सिद्धिः।

द्रौपद्या ११अङ्गाध्ययनम्, बहुवर्ष-पर्यायपालनम्, मासिकसंलेखना, आलोचितप्रतिक्रान्ततया कालं कृत्वा ब्रह्मलोके १०सागरायुर्देवतयोत्पादः, ततश्च्युत्वा विदेहे सेत्स्यति। इति षोडशम्।

(१७) **अश्वः** - हस्तिशीर्षपुरे नौवणिजः, लवणसागरे दिङ्मोहेन कालिकद्वीपप्राप्तिः, तत्र हिरण्याद्याकराणां जात्यजवनाश्वानां च दर्शनम्, हिरण्यादि गृहीत्वा प्रत्यावृत्य राज्ञः प्राभृतदानम्, आश्चर्यदर्शनगोचरराजप्रश्नेऽश्वव्यतिकरकथनम्, राज्ञा

धनेन नगरगुप्तिकानां प्राभृतदानम्, युष्माकं कनकादि, मम सुंसुमा दारिका-इति कथनम्, तैश्चौरैः सह युद्धकरणम्, चौराणां पराभवः पलायनं च, कनकादि गृहीत्वा नगरगुप्तिकानां प्रतिगमनम्, धनस्य पुत्रपञ्चकेन सह चिलातिपुत्रस्य तर्जनादि-पुरस्सरं पृष्ठतो लग्नत्वम्, सुंसुमानिर्वाहा-सामर्थ्ये तन्मस्तकं छित्त्वा तद् गृहीत्वा चिलातेरटवीप्रवेशः, (साधुदर्शनादिव्यति-करः), कालगमनम्।

श्रान्ततया तद्ग्रहणेऽसमर्थानां धना-

दीनां निवर्त्तनम्, तत्कबन्धं दृष्ट्वा सुचिरं रुदनम्। ततोऽपि क्षुत्तृड्बाधितानामुदक-गवेषणम्, तदप्राप्तौ सुंसुमामृतकगतमांस-शोणिताभ्यां निर्वाहः, ततो राजगृहे गमनम्, धनाद्याभागित्वम्।

अन्यदा श्रीवीरसमवसरणम्, धर्मं श्रुत्वा धनसार्थवाहस्य प्रव्रज्या, ११ अङ्गाध्ययनम्, मासिकसंलेखना, सौधर्म उत्पादः, महाविदेहे सेत्स्यति।

यथा धनेन न वर्ण-रूप-बल-विषयार्थं सुंसुमामांसशोणित आहृते, अपि

तु राजगृहप्रापणार्थम्, एवं निर्ग्रन्थादिरपि न वर्णाद्यर्थम्, अपि तु सिद्धिगमनप्रापणार्थमाहारयत्याहारम्, सोऽर्चनीयो यावन्मोक्षः। एवं विपरीतसूत्रमपि नेयम्। इत्यष्टादशमम्।

(१९) महाविदेहे पुष्कलावतीविजये पुण्डरीकिणीनगर्यां महापद्मराजा, पद्मावती-देवी, कुमारौ-पुण्डरीकः, कण्डरीकश्च, स्थविरान्तिके धर्मं श्रुत्वा पुण्डरीकं राज्ये स्थापयित्वा राज्ञो दीक्षा, १४ पूर्वाध्ययनम्, यावत् सिद्धिः।

पुनः कदाचित् स्थविरसमवसरणम्, पुण्डरीकस्य गृहिधर्मस्वीकारः, कण्डरीकस्य प्रव्रज्या, ११ अङ्गाध्ययनम्, अन्तप्रान्ताद्याहारेण रोगोदयः, स्थविराणां पुण्डरीकिण्यां कदाचिदागमनम्, शैलकवच्चिकित्सा।

कण्डरीकमुनौ नीरुग्बलिकशरीरे सति स्थविराणां विहारः, कण्डरीकस्य मनोज्ञाशनादिगृद्धतया तत्रैवावस्थानम्, पुण्डरीकराज्ञा-धन्योऽसि त्वम्, येन त्यक्तं राज्यादि, अहं पुनरधन्यः-इत्याद्युपबृंहणे पुनः पुनः

कृते सति लज्जया स्थविरैः सह कञ्चित्कालं यावदुग्रविहारः। पुनः श्रामण्यनिर्विण्णतया प्रत्यावृत्य पुण्डरीकभवनेऽशोकपादपस्याधस्तात् पृथ्वीशिलापट्टके स्थित्वाऽपध्यानम्।

पुण्डरीकेण प्राग्वत् कथनम्, तन्मौनं दृष्ट्वा- भदन्त ! भोगैरर्थः ? - इति प्रश्नः, तदनुमतिः, पुण्डरीकेन तद्राज्याभिषेककरणम्, स्वयं पञ्चमुष्टिलोचकरणम्, चातुर्यामधर्मप्रतिपत्तिः, कण्डरीकोपकरणग्रहणम्, स्थविरवन्दनादि कृत्वा तदन्तिके

प्रतिपद्य चातुर्यामं धर्मं कल्पते म आहर्त्तुम्-इत्यभिग्रहग्रहणम्, प्रस्थानं च।

कण्डरीकस्य प्रणीताहाराऽतिजागरिता-ऽतिभोजनेन चाहारसम्यक्परिणामाभावः, पित्तज्वरदाहदुःषहवेदनोदयः, राज्यादिगृद्धतया मृत्वा सप्तमपृथ्व्यामुत्कृष्टस्थितिकनारकतयोत्पादः।

एवं यो निर्ग्रन्थादिः पुनरप्यास्वादयति कामभोगान्, स हीलनीयो यावत् संसारः, कण्डरीकवत्।

पुण्डरीकानगारस्य स्थविरान्तिके

गत्वा पुनश्चातुर्यामधर्मप्रतिपत्तिः, षष्ठ-पारणके शीतरूक्षाहारग्रहणम्, तत्सम्यक्-परिणामाभावतः पित्तज्वरदाहदुःषहवेद-नोदयः, अन्तिमाराधना, सर्वार्थसिद्धावु-पपादः, तत उद्वर्त्त्य सेत्स्यति विदेहे।

एवं यो निर्ग्रन्थादिः कामभोगेषु न रज्यति, स वन्दनीयो भवति, यावन्मोक्षः, पुण्डरीकवत्। इत्येकोनविंशतितमं ज्ञातम्। इत्याद्यः श्रुतस्कन्धः।

# अथ द्वितीयः श्रुतस्कन्धः

## धर्मकथा

दशात्र वर्गाः। आद्ये पञ्चाध्ययनानि।

(१-१) चमरचञ्चा-कालावतंसकभवनतः कालीदेव्या राजगृहे भगवदन्तिके सूर्याभदागमनम्, भक्तिनाट्यं दर्शयित्वा प्रतिगमनम्, गौतमस्वामिपृच्छायां भगवता तत्प्राग्भवकथनम् - जम्बूद्वीपभरत आमलकल्पानगर्यां कालगाथापतिः कालश्रीभार्यासुता काली वृद्धकुमारी, श्रीपार्श्वनाथदेशनां श्रुत्वा

पुष्पचूलार्यापार्श्वे प्रव्रज्या, ११अङ्गाध्ययनम्, बहुचतुर्थादितपःकरणम्, कदाचित् शरीरबकुशभावगमनम्, यावत् (सुकुमालिकावत्) पृथग्वसतिगमनम्, पाक्षिकानशनम्, अनालोचितप्रतिक्रान्ततया कालं कृत्वा कालीदेवीतयोपपादः, २$^{१}/_{२}$ पल्यायुः, ततो विदेहे सेत्स्यति।

(१→२-५) एवं चमरेन्द्रशेषाग्रमहिषीचतुष्कवृत्तमपि मातापितृस्वनामपरावर्त्तेन विज्ञेयम्।

(२→१-५) एवं बलीन्द्राग्रमहिषी-

पञ्चकवृत्तं ज्ञेयम्, नवरं नगरी श्रावस्ती, देव्यायुः - ३ $^{१}/_{२}$ पल्योपमाः।

(३→१-५४) एवं चमरेन्द्रवर्ज-दक्षिणेन्द्राग्रमहिषीवृत्तम्, नवरं वाणारसी नगरी, देव्यायुः साधिकार्धपल्यम्।

(४→१-५४) एवं बलीन्द्रवर्जोत्तरेन्द्राग्रमहिषीवृत्तम्, नवरं चम्पानगरी, देव्यायुर्देशोनपल्यम्।

(५→१-३२) एवं दक्षिणवानमन्तरेन्द्राग्रमहिषीवृत्तम्, नवरं नागपुरम्, अर्धपल्यं स्थितिः।

(६→१-३२) एवमुत्तरवानमन्तरेन्द्राग्रमहिषीवृत्तम्, नवरं साकेतनगरम्। अर्धपल्यं स्थितिः।

(७→१-४) एवं सूर्याग्रमहिषीचतुष्कवृत्तम्, अरक्षुरी नगरी, स्थितिरर्धपल्यम् + ५०० वर्षाणि।

(८→१-४) एवं चन्द्राग्रमहिषीचतुष्कवृत्तम्, मथुरानगरी, स्थितिः - अर्धपल्यम् + ५०,००० वर्षाणि।

(९→१-८) एवं सौधर्मेन्द्राग्रमहिषीवृत्तम्, द्वे द्वे श्रावस्त्याम्, हस्तिनापुरे,

काम्पिल्यपुरे, साकेतनगरे च, सर्वासां पितरः पद्मनामानः, मातरो विजयानाम्न्यः, देवीस्थितिः - ७ पल्योपमानि।

(१०→१-८) एवमीशानेन्द्राग्रमहिषीवृत्तम्, द्वे द्वे वाणारस्याम्, राजगृहे, श्रावस्त्याम्, कौशाम्ब्यां च। स्थितिः ९ पल्योपमानि। सर्वासामपि ततश्च्च्युत्वा विदेहे भविष्यति सिद्धिः।

इति द्वितीयश्रुतस्कन्धः।

मिथ्याऽस्तु दुःसञ्चितं मम। शोधयन्तु बहुश्रुताः। सञ्चयोऽयमाचार्यकल्याणबोधेः

कर्मारिशून्यनेत्रे वैक्रमेऽब्दे (वि.सं. २०६८) ज्येष्ठासितषष्ठीदिने सम्पन्न इति शम्।

## DON'T MISS IT

## પ્રાચીન શાસ્ત્રશૈલીનું રહસ્યોદ્ઘાટન




લેખક

**પ.પૂ. બહુશ્રુત**

**મુનિરાજશ્રી ગુણહંસવિજયજી મ.સા.**

COMING SOON

## જીવન્મુક્તિનું વરદાન




મૂળકાર

**મહો. શ્રીયશોવિજયજી મ.સા.**

શ્લોકવાર્તિકકાર

**આ.શ્રી કલ્યાણબોધિસૂરિજી મ.સા.**

## JUST COMING

# ઉપનિષદોનું અમૃત




મૂળકાર

**અજ્ઞાન પ્રાચીન મહર્ષિઓ**

શ્લોકવાર્ત્તિકકાર

**આ.શ્રી કલ્યાણબોધિસૂરિજી મ.સા.**

## DIDN'T YOU READ IT?

## અધ્યાત્મનો અણમોલ ઉપહાર




મૂળકાર

**શ્રી પદ્મનંદી**

ટીકાકાર

**શ્રી કલ્યાણબોધિસૂરિજી**

# *Don't Miss it.*




મૂળકાર

**મહાયોગી શ્રી આનંદઘનજી મહારાજ**

પરિશીલનકાર

**આ. શ્રી કલ્યાણબોધિસૂરિજી**

લાભાર્થી

## શ્રી સુભાનપુરા શ્વે. મૂર્તિ. જૈન સંઘ

સુભાનપુરા, વડોદરા.

જ્ઞાનનિધિના સદ્વ્યય બદલ
શ્રીસંઘ તથા ટ્રસ્ટીઓની
ભૂરિ ભૂરિ અનુમોદના

૧૨૪